यवृत्तयो ह्यत्र अपि सूक्ष्माः स्पर्शमात्रविदः वृक्षादयः तेभ्यो रसवेदिनो मत्स्यादयः तस्मात् पश्यन्ति पादपा इति श्रुतिप्र
द्गालत्वात् ज्ञानादि प्रथमं स्पर्शेन्द्रियवृत्तिर्वृक्षादिभ्यः प्रवराः रसवेदिनो मत्स्यादयः श्रेष्ठा गन्धविदो

भ्रमरादयः शाब्दविदः सर्पादयः २९॥

श्री॰ भा॰ त॰ टी॰ ९०

मद्धिष्ण्यं मम प्रतिमादि तस्य दर्शनादिभिः सत्त्वेन धैर्येण असङ्गेन वैराग्येण १६ १७ १८ मद्धर्मिणो भगवद्धर्मान्
तः पुरुषस्याशयः चित्तं प्रयत्नं विनैव प्राप्नोतीत्याह दृष्टान्तः १९ वातो रथः प्रापको यस्य स आशयात् स्थानात् आवृङ्क्ते आश्रये

मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च १७ आध्यात्मिकानुश्रव
णान्नामसङ्कीर्तनाच्च मे आर्जवेनार्यसङ्गेन निरहङ्क्रियया तथा १८ मद्धर्मणो गुणैरेतैः परिसंशुद्ध
आशयः पुरुषस्याञ्जसाभ्येति श्रुतमात्रगुणं हि माम् १९ यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशया
त् एवं योगरतं चेत आत्मानमविकारि यत् २० अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा तम
वज्ञाय मां मर्त्यः कुरुतेऽर्चाविडम्बनं २१ यो मां सर्वेषु भूतेषु सन्तमात्मानमीश्वरं हित्वार्चां भजते
मौढ्याद्भस्मन्येव जुहोति सः २२ द्विषतः परकाये मां मानिनो भिन्नदर्शिनः भूतेषु बद्धवैरस्य न
मनः शान्तिमृच्छति २३

सा करोमि अर्चादिस्तमेव यच्चेतः चित्तं शुद्धं च सर्वभूतात्मदृष्ट्यैव भवतीति वदन् केवलप्रतिमादिनिष्ठं निन्दं
त्यहं सर्वेष्विति २० अर्चैव विडम्बनं अनुकरणं अर्चायां पूजायां विडम्बनमिति वा अवतो मन्दा द्वेषिणो दाम्भिकेन

९०

अविच्छिन्ना संतता ॥ ११ अहैतुकी फलाभिसंधानशून्या अव्यवहिता भेददर्शनरहिता च मद्गुणश्रुतिमा[illegible] मयि पुरुषोत्तमे मनोगतिर्विविधा या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणं भवति यतः लक्षणं स्वरूपं भ[illegible] ह्युदाहृतम् ॥ १२ सालोक्यं मया सह एकस्मिन् लोके वासः सार्ष्टिः समानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपता एकत्वं सायुज्यं उत अपि दीयमानमपि न गृह्णंति [illegible] मत्सेवनं विनेत्यर्थः

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ॥ ११ लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥ १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णंति विना मत्सेवनं जनाः ॥ १३ स एव भक्तियोगाख्य आत्यंतिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते ॥ १४ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः ॥ १५

[illegible] एवं परमफलत्वादित्याह ॥ १३ [illegible] परमफलप्रसिद्धि[illegible] एवंभूताया भक्तेः साधनान्याह निषेवितेनेत्यादि ॥ १४ निषेवितेन सम्यगनुष्ठितेन अनिमित्तेन निष्कामेन स्वधर्मेण महीयसा [illegible] क्रियायोगेन [illegible] निष्कामेन ॥ १५ ॥

श्री भा टी ३.९

अचक्षुषः अज्ञस्य मिथ्याभूतेदेहादावभिमतिर्यस्य कर्मस्वनुविद्धया तत्तया धिया श्रान्तस्यातएवाश्रये तमसि प्रसुप्तस्य त्वमाविरासीः योगप्रकाशको भास्करः किलाविर्भूतोसि ५ श्लक्ष्णं सुन्दरं ६ मार्गैः प्रकारविशेषैः भाव्यते प्रभाव्यते गुणमार्गेण पुंसां भावो भिद्यते अभिप्रायः फलसंकल्पभेदाद्भक्तिभेद इत्यर्थः ७ अभिसंधाय संकल्प्य भिन्नदृक् भेददर्शी यो भावं भक्तिं कुर्यात् स तामसः पृथग्भावः

लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये श्रान्तस्य कर्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः॥५॥ मैत्रेय उवाच॥ इति मातुर्वचः श्लक्ष्णं प्रतिनंद्य महामुनिः आबभाषे कुरुश्रेष्ठ प्रीतस्तां करुणार्दितः॥६॥ श्रीभगवानुवाच॥ भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते स्वभावगुणमार्गेण पुंसां भावो विभिद्यते ७ अभिसंधाय यो हिंसां दंभं मात्सर्यमेव वा संरंभी भिन्नदृग्भावं मयि कुर्यात्स तामसः ८ विषयानभिसंधाय यश ऐश्वर्यमेव वा अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ९ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः।१०

भेददर्शी ८ कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं कर्मार्पणं भवत्विति उद्दिश्येत्यर्थः यष्टव्य ... क्रियमाणं त्रिविधं भेददृष्टिमत्त्वाच्चादावर्चनेन त्रिविधं समानं तदेवानन्यस्मादिभक्तित्रयस्य प्रत्येकं श्रवणकीर्तनादयो नवभेदाः तदेवं सगुणा भक्तिरेकाशीतिभेदा निर्गुणा तु भक्तिरेकविधैवेत्याह द्वाभ्यां १०

38

१०६

स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वादिभेदात् प्रकृतौ देहे ४३ स्वांशस्य जीवस्य बंधहेतुं दैवीं देवस्य विष्णोः शक्तिं पराभाव्य निरस्य स्वरूपेण वर्त्तमानेन ब्रह्मत्वेनावतिष्ठते ४४ ॥ इति श्रीभावार्थदीपिकायां तृतीये अष्टाविंशोध्यायः ॥ २८ एकोनत्रिंशके भक्तियोगस्तु विस्तरात् उच्यते कालस्य च बलं घोरं संसृतिप्रविरक्तये उक्तमनुवदन्ती भक्तिमार्गभेदान् पृच्छति द्वाभ्यां लक्षणमिति महदादीनां यथा सांख्येषु

स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४४ इति भागवते तृतीयस्कंधे कपिलयशोभिनाम अष्टाविंशोध्यायः ॥ २८ देवहूतिरुवाच लक्षणं महदादीनां प्रकृतेः पुरुषस्य च स्वरूपं लक्ष्यतेमीषां येन तत्पारमार्थिकम् १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो २ विरागो येन पुरुषो भगवन् सर्वतो भवेत् आचक्ष्व जीवलोकस्य विविधा मम संसृतीः ३ कालस्येश्वररूपस्य परेषां च परस्य ते स्वरूपं बत कुर्वन्ति यद्धेतोः कुशलं जनाः ४

च कथितं तथा येन लक्षणेन तत्त्वानां पारमार्थिकं परस्परं विभक्तं स्वरूपं लक्ष्यते भक्तियोगो मूलं प्रयोजनं यस्य तद्यन्मूलं तत्प्रचक्षते तस्य भक्तियोगस्य मार्गं प्रकारं विस्तरतो मे ब्रूहि २ येन संसृतीनामाख्यानेन विरक्तो भवेत् ३ ईश्वररूपस्य महदादीनां प्रकृत्यादीनामपि कालस्य यद्धेतोः यद्भयात् कुशलं पुण्यं कुर्वन्ति ४ ॥

अन्तर्गतमार्गेण वायोर्वेगं मित्यर्थः जनेन पित्रादिना जनं पुत्रादिं जनयन् आदिकृत् मृत्युनान्तकमपि मारयन्नन्तकः अ
नादित्वेनोऽव्ययश्च ४५ ॥ इति श्रीभावार्थदीपिकायां तृतीय एकोनत्रिंशोऽध्यायः २९ त्रिंशेऽत्र कायकान्तादिलालना
ऽलंचेतसां कामिनां तामसीं पापादधोगतिः कथ्यते कालप्रभाववर्णनपूर्वकं वैराग्याय विचित्रकर्मफलोक्तिमस्तीति
अध्यायत्रयेण प्रपंचयति तस्यैतस्य बलिनः कालस्य बलिनेति पाठः काल्यमानोऽपि वायोरिव विक्रमेय

वर्तते ग्रामोऽयं बोधयत्यजस्रमाचरं सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः जनं जनेन जनयन्मारयन्मृ
त्युनान्तकं ४५ ॥ इति श्रीभागवते तृतीयस्कंधे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ कपिल उवाच ॥ तस्यैतस्य जनो नूनं ना
यं वेदोरुविक्रमं काल्यमानोऽपि बलिनो वायोरिव घनावलिः १ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे
तं तं धुनोति भगवान् पुमान् शोचति यत्कृते २ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते
मोहाद्गृहक्षेत्रवसूनि च ३ जन्तुर्वै भव एतस्मिन् यां यां योनिमनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न वि
रज्यते ४ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५

घनावलिर्मेघपंक्तिर्न वेद विक्रममेवाह १ यं यमर्थं दुःखेन प्रयासेनोपादत्ते आपादयति तं तं भगवान् कालो धुनोति वि
नाशयति यत्कृते यन्निमित्तं २ शोके हेतुः यद्यस्मात् अध्रुवस्य कलत्रादिसहितस्य संबंधीनि च गृहादीनि अ
नुक्रमस्वयार्थस्वकामः दर्शयति वैदर्ण्यं न दुःखं प्रपंचयति चतुर्दशभिः ३ ४ ना
रक्यां नरकाहारादिभिर्जीवंत्यां ५ ॥

विचित्रैर्नानासंभूतिलक्षणां यस्मात्तत् । दैवप्रेरितकर्मभूताः संहत्य विचित्र इत्यर्थः कीदृशं रूपभेदास्पदं वस्तूनामन्यथात्वमास्पदमाश्रयः कारणं तद्धि कालाख्यं गुणव्यतिकर इति वदन्ति च गुणव्यतिकरः कालः तद्दिव्यमद्भुतप्रभावम् तदेवाह यावत्समाप्ति ३६ महदादीनां तत्तदभिमानिनां जीवानां भयहेतुत्वमाह य

भूतानां महदादीनां यतो भिन्नदृशां भयं । योऽन्तः प्रविश्य भूतानि भूतैरत्यखिलाश्रयः ३७ स विष्ण्वाख्यो
ऽधियज्ञोऽसौ कालः कलयतां प्रभुः । न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः ३८ आविशत्यप्रमत्तोऽसौ प्र
मत्तं जनमन्तकृत् । यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् । यद्भयाद्वर्षते देवो भगणो भाति य
द्भयात् । यद्वनस्पतयो भीता लताश्चौषधिभिः सह ४ स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फला
नि च । स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः ४२ अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात् । न
भो ददाति श्वसतां पदं यन्नियमाददः ४३ लोकं स्वदेहं तनुते महान्सप्तभिरावृतं । गुणाभिमानिनो देवाः
सर्गादिष्वस्य यद्भयात् ४४ ॥

इति भूतैर्वध्यभूतान्यत्ति संहरति ३७ अधियज्ञो यज्ञफलदाता कलयतां वशीकुर्वतां ३८ ३९ ४० यद्यस्मा
द्भीताः ४१ इन्धे दीप्यते गिरिभिर्भूः अधो न मज्जति आवकाशं श्वसतां प्राणिनां ४३ महान्महत्तत्त्वं स्वेन कार्यात्मकेन
देहेन लोकाख्येन ततं विस्तारयति गुणाभिमानिनो गुणनियन्तारः देवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषु
वर्तन्ते ४४ ॥ ॥

श्री
भा न
टी
११

अवमत्याचतान्यत्र यत्नास्ते समीपे प्रविष्टे गृहपालः श्वा आहूतः संज्ञानः आमयावी रोगी १५ उन्नरोव
हि निर्गतो नेत्रः कफेन संरुद्धानां कुर्योयम् कालस्य आभ्यां कृतनश्वासायस्य घुरघुर इति शब्दं करोति १६ परिवीतः
परिवेष्टितः वाच्यमानो बंधुना तातेत्याहूयमानः १७ अस्तधीः नष्टमतिः मतस्य ग्रस्तपाशग्रंथ्यां ह्येगात् तत्राय
नी

आलेवमत्यापन्यस्ते गृहपालं श्वाहरन् आमयावि प्रदीप्ताग्निः अल्पाहारोल्पचेष्टितः १५ वायु
नोत्क्रमतोत्तारः कफसंरुद्धनाडिकः कासश्वासकृतायासः कंठे घुरघुरायते १६ शयानः परि
शोचद्भिः परिवीतः स्वबंधुभिः वाच्यमानोपि न ब्रूते कालपाशवशंगतः १७ एवं कुटुंबभरणे
व्यापृतात्माजितेंद्रियः म्रियते रुदतां स्वानामुरुवेदनयास्तधी १८ यमदूतौ तदा प्राप्तौ भी
मौ सरभसेक्षणौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १९ यातनादेहमावृत्य पाशै
र्बद्ध्वा गले बलात् नयतो दीर्घमध्वानं दंड्यं राजभटा यथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जात
वेपथुः पथि श्वभिर्भक्ष्यमाण आर्तोघं स्वमनुस्मरन् २१ क्षुत्तृट्परीतोर्कदवानलानिलैः संत
प्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रयोदके २२ तत्र
तत्र पतन् श्रान्तो मूर्छितः पुनरुत्थितः यथा पापीयसा नीतस्तमसा यमसादनं

ग्रामितमाह १८ सरभसं सक्रोधमीक्षणं ययोस्तौ दृष्ट्वा १९ आहृत्य निरुध्य २० तर्जनैर्निर्भिन्नं हृदयं यस्य
सः स्वमघं चलनीति द्वितीयेनान्वयः २१ क्षुत्तृड्भ्यां परीतो व्याप्तः तप्ता वालुका यस्मिन् निर्गत आश्रयः विश्रा

निरूढमूलं प्रसूतमनोरथं हृदयं यस्य वक्रमनोत हृता थी हमिति स्वार्थो दहनादिनापो घा चिन्तयाद्दाश
यत्नमाह ९॥ १ अनित्यमात्मा इन्द्रियाणि च यस्य कया: मतीनां च लीनां हास्य चिन्तयामि भोगादि रूपया
मधुरभाषिणा शिसूनां आलापे मूलमस्य वक्रमन्यते स्तनौ गुणं निर्वयः ८ हृदा चिन्तया आदि वक्र लाधर्मा येषु

आत्मजायामु नागाय पंगुद्रविणावेषु च निरूढमूलहृदय आत्मानं वक्रमन्यते ९ मदृशम
नमेवां च पद्माम दहनादिना केवानां विरतं स्तुति कृतं निद्राशयः १ अनित्यमनिन्द्रियः स्त्रीणा
मसतीनां च मायया देहो रक्षितमालापैः शिशूनां कलभाषिणां ८ गृहेषु कूटधर्मेषु दुःखतो
देषु तद्धितः कुर्वन् द्रव्यप्रतीकारं स्त्रवक्तमन्यते मूढो ९ अर्थैर्यानादिभिस्तैर्यथा हि स्वयोनास्तृप्ततानात् ≡
गृहानित्य संयोषिता शायनस्यात्म प्रमानं १० नानीश्वर मानाया तात् दायान पुनः लो
मूढानि संयोजितानां मं ११ कुटुम्बभरणा कल्पा मन्दभाग्या हृष्टा यतः श्रियाविहो
भगिनीस्नेहः पराणे कृ कनी स्पृहा ११ कुटुम्बभरणाकल्पं नमूलं दूष्यं हलदा नाद्रियेत यथा पूर्व
नः कृपणाय न स्मितिमूढधीः १२ एवं स्वभरणाकल्पं तत्कलत्राद्यं यत्तदा नाद्रियेत यथापूर्व
वैकीनाशा नृगोचरं १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयंभृतैः जरयोपात्तवैरूप्यो मरणाभिमु

वाचीयांजीवि ९
द्भिः वैप्रधानेषु ९ यत्रापोषयत्नाथे याति स्मृत्यानि पुष्टभुक्तिनि मोगो पितरच्छलेभ्यूपथः १० वानीयांजीवि
काया निः स्वनः अमनम थेः परस्य चरखे ११ कृष्णेकामामर्थः १२ मृष्टैर्यथादित्यैस्तथादनं कुर्वंति कीन
स्या: कृयमाणः कुशीबला: मोजरं हृदं बलीवर्दं १३
भ्रियमाणः स्वकर्मणा १४॥

श्री
भा तृ
टी
१११

तमसो नरकस्य चरमं पदं स्थानं तत्र नरकेषु अन्धतामिस्रकारणमाह ३३ मनुष्यदेहमप्राप्य नरकान् यावतीर्या
तनाः आदिशब्देन सूकरादियोनयस्ताः ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः सन् अत्र पुनर्नरत्वं प्राप्नो
तीत्यर्थः ३४ ॥इति श्रीभावार्थदीपिकायां तृतीये त्रिंशोऽध्यायः॥३० एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहेत्य मनुष्य
योनिं संप्राप्य वर्ण्यते राजसी गतिः पुनरत्रावजेदिति सूचितं तद्विशेषतो दर्शयति कर्मणा दैवनेत्रेण दैवमीश्वरः

केवलेन ह्यधर्मेण कुटुंबभरणोत्सुकः याति जीवोंधतामिस्रं चरमं तमसः पदं ३३ अधस्तान्नरलो
कस्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्रावजेत् शुचिः ३४ ॥इति श्रीभागवते तृतीय
स्कंधे कापिलेये पाद्मोत्तरे कल्पे कर्मविपाको नाम त्रिंशोऽध्यायः ३० ॥श्रीभगवानुवाच॥ कर्मणा दैवनेत्रेण जं
तुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः १ कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदं १
दशाहेन तु कर्कंधुः पेश्यण्डं वा ततः परम् २ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगविग्रहः नखलोमा
स्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः सप्त पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कु
क्षौ भ्राम्यति दक्षिणे ४ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते ४

दैवं नेत्रं प्रवर्तकं यस्य प्रविष्टो भवति १ कललं शुक्रशोणितसंमिश्रितं भवति बुद्बुदं वर्तुलं भवति कर्कंधु
र्बदरीफलं तदाकारं कठिनं पेशी मांसपिंडाकारः अण्डं च योन्यंतरे २ बाह्वंघ्र्याद्यंगानां विग्रहो विभागः लिंगं च छि
द्राणि च तेषामुद्भवः ३ जरायुणा गर्भवेष्टनेन वीतः संवृतः ४ ॥

अथनःसंबधिनोयोजनानांनवतिनवयुतसहस्राणिपापाधिकोद्वाभ्यांनीतःसन्यातनाःसंप्रेत्यतोदर्शयति २४
आदीपनंप्रज्वालनंआत्मनिश्वनह्... यत्नस्य... मांसभक्षणमित्यर्थः २५ आत्मनोवेषामयी
... २६ भिदापणंभेदापणंन... विनतमज्ञायि... ह्यमानतादिताह २७ मिथःअन्योन्यंमेलनेननिर्मि

योजनानांसहस्राणिनवतिंनवचाध्वनः । त्रिभिर्मुहूर्तैर्द्वाभ्यांवानीतःप्राप्नोतियातनाः २४ आदीपनंस्वगा
त्राणांवेष्टयित्वोल्मुकादिभिः । आत्ममांसादनंक्वापिस्वकृत्तंपरतोपिवा २५ जीवतश्चान्त्राभ्युद्धारःश्व
गृध्रैर्यमसादने । सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृन्तनंचावयवशोगजादिभ्योभिदापनं
पातनंगिरिशृङ्गेभ्योरोधनंचाम्बुगर्तयोः २७ यास्तामिस्रान्धतामिस्रारौरवाद्याश्चयातनाः । भुङ्क्ते नरोवा
नारीवामिथःसङ्गेननिर्मिताः २८ अत्रैवनरकःस्वर्गइतिमातःप्रचक्षते । यायातनावैनारक्यस्ता
इहाप्युपलक्षिताः २९ एवंकुटुम्बंबिभ्राणउदरम्भरएवच । विसृज्येहोभयंप्रेत्यभुङ्क्तेतत्फलमीदृश
म् ३० एकःप्रपद्यतेध्वान्तंहित्वेदंस्वकलेवरम् । कुशलेतरपाथेयोभूतद्रोहेणयद्भृतं ३१ दैवेनासादितं
तस्यशमलंनिरयेपुमान् । भुङ्क्तेकुटुम्बपोषस्यहृतवित्तइवातुरः ३२ ॥ ॥ ॥

नारकाः २८ उभयंकुटुम्बंस्वदेहंच ३० ... कुटुम्बपोषणेनैवनरकंयातीत्याह ३१ भू
तद्रोहेणयद्भृतंतत्स्वकलेवरंहित्वा कुशलेतरंपापमेवपाथेयंभोग्यंयस्य नत्कुटुम्बपो
षणापापमपिविहायगच्छतीत्याह ३१ तस्यकुटुम्बपोषणस्यशम
लंपापं दैवेनईश्वरेणासादितंप्रापितंभुङ्क्ते कुटुम्बपोषणं
विहितमेवनत्वाह ३२

नाथमानो याचमानः उपलभ्यमान इत्यादि ऋषिः देहान्तदर्शीभीतः पुनर्गर्भवासात् तस्य प्रयोवंध नभूतापात् वायस्या विक्लवया अञ्जलया ॥ उपसन्नं जडं हि लब्ध्वा स्वेच्छया गृहीतनानामूर्तेः भगवतः चरणारविन्दम् उक्तो भयमोहशाणां ब्रजाभिभवि चलदिति श्रीकृष्णावताराभिप्रायेण अनतोऽजे नस्य मनुष्यरूपं प्राप्य येनेह श्रीमभवात्मलक्षणागतिर्दर्शिता तस्य ननु कोऽसौ यः प्राणान् भजति को वा तस्य विशेषः येन स्वात्मैव कर्तृनामिति यामाह यस्त्विति अत्र मातृदेहभृते द्वियाश्रयमयोऽद

नाथमानो ऋषिर्भीतः सप्तवध्रिकृतांजलिः स्तवीतं विक्लवया वाचा येनोदरेऽर्पितः ॥ ११ **जीव उवाच** ॥ तस्योपसन्नमवितुं जगदिच्छयात्त नानातनोर्भुवि चलच्चरणारविन्दं सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा ॥ १२ यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायां आस्ते विशुद्धमविकारमखण्डबोधम् आतप्यमानहृदयेऽवसितं नमामि ॥ १३ ॥ ॥

नाकाररूपिण्या मायाया बलं आश्रित्य कर्मभिरावृतस्वरूपः बद्ध इव वर्तते सोऽहं यस्त्वैवानमामि कथंभूतं नमितं पृथायां तथाहोक्तविशेषं दर्शयति आतप्यमानहृदये लक्षितं प्रतीतमेवमप्यविकारं तत्र कुतो विशुद्धं निरुपाधितत्वं कुतः अखण्डबोधं यस्मात्तेन नन्तवमपि वस्तुतः शुद्ध एव अतो यथा घटेति न्यादिश्रुते तत्र कथं तयोरयं विशेषस्तत्राह ॥ १३ ॥ ॥ श्रीराम

मातुः जठरेण भक्षितेनान्नपानादिना एधमानाधातवो यस्य जन्तोः सम्भवाय स्मिन् अस्मिन् गर्भे विधमेशाते ।
तथा च मार्कण्डेय पुराणे नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथान्त्रसुषिरे सा निबद्धोपजा
यते कामं तस्य तत्पीतानि भक्ष्याणि स्त्रीभिर्दत्तया तेनाप्यायितदेहोऽसौ जन्तुर्वृद्धिमुपैति वै इति ५ तत्र कैः क्रि
मिभिः वादद्भिः सौकुमार्यात् कोमलेन नवानि सर्वाङ्गानि यस्य ६ उल्वेन जरायुणा संवृतः सर्वं पिण्डमावृत्य

मातुर्जठरस्थेन पानादिना एधमानः समते शोतविण्मूत्रयोर्गर्ते स जन्तुर्जन्तु सम्भवे ५ किमिभिः तु
न सर्वाङ्गैः सौकुमार्यात् प्रतिक्षणं मूर्च्छां प्राप्नोति अनुक्षणं मन्त्रैः तप्यते सङ्कुलः ६ कटुतीक्ष्णो
ष्णलवणरूक्षाम्लादिभिः उल्बणैः मातृभुक्तैः उपस्पृष्टः सर्वाङ्गोत्थितवेदनः ७ उल्वेन संवृ
तः तस्मिन्नन्त्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ८ अकल्पः स्वा
ङ्गचेष्टायां शकुन्त इव पञ्जरे तत्र लब्धस्मृतिर्दैवात् कर्म जन्मशतोद्भवं ९ स्मरन् दीर्घमनुच्छ्वा
सं शर्म किं नाम विन्दते आरभ्य सप्तमान्मासात् लब्धबोधोऽपि वेपितः नैकत्रास्ते सूतिवातैर्विष्ठा
भूरिव सोदरः १० ॥

तावेदनायस्य आर्तो ह्यनुतरेण जनयः १ उल्वेण जरायुणा संवृतः कुक्षौ भुग्नपृष्ठशिरोधरा ग्रीवा च यस्य
८ दैवात् पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः दीर्घं दुःखं तं अनुच्छ्वासं यस्य भवति तथा तत्र स्थितः सन्
९ सूतिहेतुभिः वातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः विष्ठोत्पन्नः क्रि
मिरिव १० ॐ नमो भगवते वासुदेवाय नमः॥

श्री
भा ग
टी
११२

43

अन्यदेहविवरेषु अलंकृदारूढ्हेयः अस्त्रनिविष्टाम्नेयकापातस्मिन्पतितः तत्रजडवाग्निनाभूषांतमोदेहो यस्य अतपवक्रूपाणाधीर्यस्यः तौविवरान् विवमितनिर्गतमिवजनसमानाणायनमोकदातवहिर्निवास्य तेनजतनमपकारमस्तनाह १७ यनेहर्षीगातिज्ञानेभवाहयोनेतिनिरूपमेत्यर्थः सहतनेवस्यतनघांत अंजलिमात्रविनातन हातोपकारेकः अन्यपकारकुर्यादित्यर्थः हेर्षीगातिमित्यनेनजान्यतरविलक्षणा ज्ञानेश्वार्थिनसानित्युक्तं तदेववैलक्षण्यमाह १८ अथमपरःपश्चादिःसप्तवर्षिःजीवःस्वदेहेपारीरकपारी सो

देहान्यदेहविवरेजवह्निनाम्नैव वाम्नेयकपतितोभूयातमदेहः इन्द्रियतोविस्मितमायानायन्त्र मामानिर्वास्यतेकृपाणाधीर्भगवक्रदात १७ यनेहर्षीगातिमसोदमामास्तईयामेग्राहितःपृष्ठत यनभवाहस्थान सनेवतत्थाजन्तोतेनमदीननाथःकोनामततप्रतिविनांजलिमस्यकुर्यात् १८ प श्यत्ययंधिषणयाननुसप्तवध्रिः शारीरकेदमशारीर्यपरः स्वदेहे यत्स्पृष्ट्यामतमहंपुरुषंपुरा णोपश्येवहिर्हृदिचचैत्यमिवप्रतीतं १९ ॥

मभेस्यालोकः लोकोवलनम्रुणमुपल्यहेपुनर्यत् स्पृष्ट्याधिषणायायहनेनविवेकज्ञानेनदमशारीरीदमस्तत्रुप लब्धाणांमहंसादियुक्तशारीरवान् आममग्रभवंतमेवपुराणमनादिंपुरुषंपश्येवहिश्चहृदिमध्येचपश्ये पश्यामीत्यन्वयः कृपामपरोपदतयाप्रतीतंचैत्यमिवाहंकारास्पदंभोक्तारमिवेत्यर्थः विहारकाशीकेजप रामायनमः श्रीरामजी ॥ बालककीजय ॥

यः पञ्चभूतैः रचिते शरीरे अयथा यामि इत्यावच्छन्नः न वस्तुतः यतः केन शरीरेण रहितोऽस्ति यः अतो यथैवेन्द्रियगुणार्थ-
चिदात्मकः इन्द्रियाणि गुणाः अर्थाश्च चिदाभासश्च तदात्मकः सोऽहं तेन देहे [illegible] तेन शरीरेण अविकुण्ठमहि-
मा यस्य तमेवं वन्दे इति [illegible] यस्य स महिमा [illegible] अर्थः तत्र हेतुः प्रकृतिपुरुषयोः परं नि-
यन्तारं [illegible] विद्याशक्तिमित्यर्थः विद्याशक्त्या अविद्याशक्तेर्विशेष इति भावः [illegible]
[illegible] ॥१४॥ यस्य मायया [illegible] नष्टस्मृतिः [illegible] प्रमाणेन [illegible]

यः पञ्चभूतरचिते रहितः शरीरे छन्नोऽयथेन्द्रियगुणार्थचिदात्मकोऽहं । तेनाविकुण्ठमहिमानमृषिं तमेनं वन्-
दे परं प्रकृतिपुरुषयोः पुमांसम् ॥१४॥ यन्माययोरुगुणकर्मनिबन्धनेऽस्मिन् सांसारिके पथि चरंस्तदभि-
श्रमेण । नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमन्तरेण ॥१५॥ ज्ञानं यदेत-
ददधात् कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः । तं जीवकर्मपदवीमनुवर्तमाना-
स्तापत्रयोपशमनाय वयं भजेम ॥१६॥

तेन [illegible] जीवो महतः [illegible] विना पुनः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत
संभजेत [illegible] कर्माणि बन्धनानि यस्मिन् [illegible]
[illegible] प्रसादं विना [illegible] ॥१५॥ यदेतत्
त्रिकालविषयं ज्ञानं [illegible] जीवो [illegible] प्रकृष्टो जी-
वे दधाति [illegible] जीव [illegible] कर्मपदवीमनुवर्तमानाः [illegible] अर्थः
[illegible] ॥ [illegible] स्थिरेषु चरेषु [illegible] अनुवर्तितः [illegible]

[illegible] ८६

श्री
आ हिता
री
२५४

आसाको मलानक्र यस्पतं गतो गर्भं जातं जानेयस्य २२ योगावं पंचवर्णा त्तित पागाः योवमाद्यविकृत्तत्र चाध्याय
नादिः एवमाह सार्थेस्त्रिभिः २८ अलब्धाभीप्सितं तेन सुचार्दितः प्राप्य अज्ञानादिहादीनामन्त्ययमस्य देहेन
महेश्ववर्धमानेन मन्युनाचविरोधं करोति आत्मनोत्तायनाशाय अज्ञानं प्रपंचयति २९ भूतेपास्त्वदेहमदाग्र

पाथिनो शुचि विपर्यये जन्ते विदजन् षिते नेपाः कोश्ययेनागानामामनोत्यानचेष्टने ३० तदेत्यामनव
देणामसाकामतक्रमादय कृदेतं विगततानेकमय लमकेयथा २१ इत्येवं योगावभुक्ताः ए
योगास्सेवच अलब्धाभीप्सितो नानादिक्रमन्युः सुचार्दितः २८ महद्देहेन मानेन वर्धमानेन मन्यु
ना करोति विग्रहे कामी कामिष्ठताय चात्मनः २९ भूतेपंचभिरारब्धे देहे देहत्युपागमकृत् अहंमम
त्वमत्राह करोति क्रमतिर्मतिः ३० तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं योनुयाति ददत्क्लेशमा
विपाक कर्मबंधनः ३१ यद्यसाङ्गिः प्रपिहितः पिशाचोरज्ञतो यमैः आप्स्रितो मतेतजं तमोविणाति
एवंविधः ३२ मत्यौ चेत्यामीनत्वद्भिन्नाः श्रीयंगाः तमा गामोदमाभगवतेति यत्संगायातिमेतत्वे
३३ ॥

हाहंममेति करोति ३० तदर्थं देहार्थं येन कर्मणा बद्धो देहः अनुयाति पुनः पुनरायाति अनुवर्तते इति वाक्
तः अविपाक कर्मण्यानिवर्तते इति तथा यद्यसङ्गिरपिहितः मनते यो प्यमन्यांगामतोज्ञाप्सितो पियद्यस
ङ्गिः महतेः इति वा नहिं याति नादेहः ज्ञाहंसत्यादिषु वोक्त प्रकारेणानरके
प्रविशति ३२ अमन्तुमगनिदति त्रिभिः ३३ ॥

हे विमोवक्षुः त्वत्वासेय प्राभवति तथा गर्भे च मन्नपि मोहे गर्भा इह हि निर्गतं मिथ्या मति तत्र हेतुः अप्रकृत्य प्राप्येयन्नेव
हि गच्छति गते प्राणाने देवस्य तत्र मायापि सर्पति प्राप्नोति यदनु या मायानुमिथ्या मतिः देह हेतु हि सहति च
स्वे च धुत्र कालत्राहि सेत्र धातु पसर्पति २० तस्माद्देव हि तानि अव्याकृतलः मनःस्व यदात्मना मारचित्तं पयात
या पवात्मानं तमसः सत्रायाक्षु द्वारि ष्यामि अनेकार्थप्रेनानागर्भे वासनः पत्र मननमेत यमनेक त्वय थाम समाभ।

मोहे व मन्नपि विमोवक्षुः त्वत्वासे गर्भाश्च निर्गि गमि वहिर्धृ अक्षये यत्रा पयात मपमर्पति देवमाया
मिथ्या मति यदनु संस्मृति च क्रमेतत २१ तस्माद्देहि गत तविक्ता वत्र त्रिष्यत्रात्मानमाश्रुतमसःस
हता मने वभूयाय पयात्मा मनः स्वातदेन कार्थ्यमा मे भविष्य कपमादि तविग्रह पाद २२ का ल वा
पवेकत मति गर्भे त्वामा स्याः स्वावृतिः मधुः तिपत्ता चीने मस्मृत्य स्मृति मातत २३ तेनावम
सम हमा लक्षा वाक्षि रच्चानरः विनिष्क्रम्य तिक्त कोपानि कच्छा मां हत स्मृतिः पतितो भुवि विमाम्ब
विप्राभ्य विवचेष्टते गाहयति मन तानेविष्यश्री तानाति मत २४ परकेदं सविज्ञापुप्यमानोजने

विद्यातितया कानवा स्वमाधनमाम श्रीनवात्र दुपमादितो हदयंत्राचितो विशोः पादोयेनमयाम २५
दयामामाः परिक्लिदकायस्मृति पूर्वं तमालपलकनामात्मनि क्षपितीवः मधः तत्ताम्भेवावाप्य विमर्दिहि
तमीहतः तिपति २२ अवकृत्य धृः तिमः मन २३ मोहयते तगादिति २४ परमस्कंदमभिप्रायमविड
माजनेन धनमिप्रतं तत्या प्रमोदने नोदरस्य पांप्रकल्यानि मरस पानेन्द्रदर्व्यप्रपयागोदने नत्यपानमि
त्यादि २५ आमनोम्यानते ह्यने चालीपाः मनुमोहयते रत्ननुबंधाः २६ ॥

नोपत्यादिरूपोऽस्मीति जानीयात् मृगयोः लुब्धकस्य गायनमत्र कुलत्वेन प्रतीयमानमपि यथा मृगस्य न
हः ५२ तदेवं जीवस्य संसृतिः प्रपञ्चिता तत्र च तस्य कर्मवशेन लोकाल्लोकान्तरगमने जन्ममरणे च
ते तत्रैव प्रोक्ते नत्रस्थापकस्य कर्मलोकाल्लोकान्तरगमनेऽनित्यस्य च कर्मजन्ममरणभोगेन कर्मा
न्तरं च प्रतिजन्ममरणे च दर्शितानि कुतः पुनरर्पितस्य कर्मणः प्रभवः इति तत्र लोकान्तरगमनेकर्मवशा
भवतीत्याह देहेन जीवस्योपाधिना याभूतेन जातेन लिङ्गदेहेन लोकान्तरमनुव्रजन्नविरतं कर्माणि
करोतीति कर्माणामसस्मासिकजा जन्ममरणासंभवमाह ५३ जीवस्योपाधिर्लिङ्गदेहः अस्यात्मनो उ

तामात्मनो विजानीयात्त्यायत्यपृहात्मके देवोपमादित्तं ह्यस्मे हृगयोगायनं यथा ५१ देहे
न जीवभूतेन लोकाल्लोकमनुव्रजन् भुञ्जान एव कर्माणि करोत्यविरतं पुमान् ५२ जीवो ह्यस्या
नुगो देहो भूतेन्द्रियमनोमयः तन्निरोधोऽस्य मरणमाविर्भावस्तु सम्भवः ५४ द्रव्योपलब्धिस्था
नस्य द्रव्येक्षायोग्यता यदा तदेव चक्षुषोर्द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ५५ ॥

वर्तते भूतेन्द्रियमनोमयः स्थूलभूतादिविकारो देहो भोगायतनं तस्य निरोधः कार्यायोग्यता तु तदस्य जीव
स्य मरणमुच्यते आविर्भावस्तु सम्भवो जन्मोच्यते एतदेव स्पष्टयति ५४ द्रव्योपलब्धिस्थानस्य
नेत्रगोलकादेः द्रव्येक्षायोग्यता रूपादिदर्शने काचकामलादिदोषेण यदायोग्यता तदैव चक्षुषोरिन्द्रियस्याप्ययो
ग्यता अनयोः स्थानचक्षुषोः यद्वायोग्यता तदेव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता एवं स्थूलदेहस्यैव कल्पे लिङ्गदेह
स्यैव कल्पते देहजीवस्य मरणं नाश्यादेपमपणानस्वतन्त्र इत्यर्थः ५५ ॥

45

खण्डितात्मसु देहात्मबुद्धिषु योषितां क्रीडामृगवदधीनेषु ३४ यथा च योषित्संगिसंगतो बन्धः तथा
अन्यप्रसंगतो न भवेत् योषित्संगिसंगस्यानर्थहेतुतां प्रपञ्चयति सार्द्धैः ३५ रोहिद्भूतां मृगीरूपां सतीम् ऋक्षरू
पः निर्लज्जः सन् ३६ तेन ब्रह्मणा सृष्टा ये मरीच्यादयः पुत्राः तैः सृष्टाः कश्यपादयः तैरपि सृष्टेषु मनुष्या

तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३४ न त
थास्य भवेन्मोहो बन्धश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३५ प्रजा
पतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३६ तत्सृष्टसृष्टसृष्टे
षु को न्वखण्डितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया ३७ बलं मे पश्य मायाया
स्त्रीमय्या जयिनो दिशां या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलं ३८ संगं न कुर्यात्प्रमदासु जा
तु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ३९ यो
पयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ४० यां मन्य
ते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदम् ४१ ॥

दयः तेषु को न पुमान् अखण्डितधीः अनाकृष्टमनाः ३७ दिशां जयिनः शूरानपि ३८ प्रतिलब्ध आत्मल
ाभो येन स प्रमत्तोऽपि यां प्रमदां निरयद्वारं वदन्ति योगिनः ३९ शनैः शुश्रूषणादिमिषेणोपया
ति या योषिद्रूपा माया मृत्युं प्रतिहतां लमीक्षेत स्त्रियं प्रत्येतदेवाह यामिति द्वाभ्यां ऋषभायतीं पुरुषवदा
चरन्तीं या वित्तादिप्रदं पतिं मन्यते सा स्त्री स्त्रीसंगात् पूर्वकालीनस्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४०-४१ ॥

श्री भा टी ९६

लोके तिष्ठन्त्यपि पुण्येन यान्ति तत्र लोकानामपि लयमाह यदा चाहीन्द्रः अहीन्द्रः प्रलये भगवच्छेषे निशान्तो
तस्याभिमेव यान्तीत्याह त्रिभिः ४ ये तु कामार्थं प्रयोजनाय स्वधर्मे वर्तन्ते ते निःसंगाः अनासक्ताः न्यस्तानि ई-
श्वरे समर्पितानि कर्माणि यैः ५ विश्वतोमुखं विपरीतं पुरुषं यान्ति तथा च श्रुतिः सूर्यद्वारेण ते विरजाः

तत्र द्वयाक्रान्तमतिः पितृदेवव्रतः पुमान् । गत्वा चान्द्रमसं लोकं सोमपाः पुनरेष्यति ॥ ३ यदा चा-
हीन्द्रशय्यायां शेतेऽनन्तासनो हरिः । तदा लोका लयं यान्ति त एते गृहमेधिनाम् ॥ ४ ये स्वधर्मान्न दुह्य-
न्ति धीराः कामार्थहेतवे । निःसंगा न्यस्तकर्माणः प्रशान्ताः शुद्धचेतसः ॥ ५ निवृत्तिधर्मनिरता निर्म-
मा निरहंकृताः । स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा ॥ ६ सूर्यद्वारेण ते यान्ति पुरुषं विश्वतो-
मुखम् । परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनम् ॥ ७ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते ।
तावदध्यासते लोकं परस्य परचिन्तकाः ॥ ८ क्ष्माम्भोऽनलानिलवियन्मनइन्द्रियार्थभूतादिभिः प-
रिवृतं प्रतिसंजिहीर्षुः । अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनुभूय परः स्वयम्भूः ॥ ९

प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मेति प्रकृतिमस्योपादानकारणं उत्पत्त्यन्तभावनं निमित्तकारणं परमेश्व-
रमिति हिरण्यगर्भोपासकानामपि क्रमेणात्यन्तमाह त्रिभिः ६ परस्य हिरण्यगर्भस्य परचिन्तकाः
परमेश्वरस्य हिरण्यगर्भोपासकाः ७ क्ष्मादीनि पंचमहाभूतानि मनश्चेन्द्रियाणि च अर्थाः शब्द-
ादयः भूतादिश्चाहंकार एवमादिभिः परिवृतं प्रतिसंजिहीर्षुः संहर्तुमिच्छुः अव्याकृतं मायेश्वरं ।

[illegible] ८

46

कृचिदयमेकः स्थाणोपाधिकः पद्मतेनतत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायोग्यतायोग्यता
तत्पंचत्वंमरणंअहंमानादिदमेवाहमित्यभिमानेनद्रव्यस्यस्थूलशरीरस्यदर्शनमुत्पत्तिः अत्रदृष्टांत
कथाः द्रव्यावयवस्यरूपादेर्दर्शनेयोग्यतायोग्यतायोग्यस्ममानमम ४६ यस्मादेवंस्वतोजीवस्यजन्ममरणादि
तस्मात्मरणात् संत्रासोनकार्यः जीवनंचकार्पण्येनकार्यंसंभ्रमश्चजीवनप्रयत्नेननुमर्वध्यामुक्तसंगोन
कर्थेजीवितमतआह ४७ सम्यक्दर्शनंविविचारयंतीतितथायोगवैराग्यावियचितेलोकेकलेवरंन्यस्यति

यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यतायदा तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यायोग्यता ४६ तस्मा
न्नकार्यःसंत्रासोनकार्पण्यंनसंभ्रमः बुद्ध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४७ सम्यक्दर्शन
याबुद्ध्यायोगवैराग्ययुक्तया मायाविरचितेलोकेचरेन्न्यस्यकलेवरं ४८ इति श्रीभागवतेतृती
यस्कंधेकापिलेयोपाख्यानेजीवगतिर्नामएकत्रिंशोध्यायः ॥ ३१ ॥ कपिलउवाच ॥ अथयो
मे गृहमेधीयान्धर्मानेवावसन्गृहे कामअर्थंचधर्मान्दोग्धिभूयःपिपर्तितान् सचापिभगवद्धर्मा
त्काममूढःपराङ्मुखः यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयान्वितः १ ॥

तिप्यतस्मिन्नात्मनिर्मित्स्यान्नाचचरेदिहितपर्णः ४८ इतिश्रीभागवतेतृतीयेएकत्रिंशः ॥ ३१ ॥ द्वात्रिंशेमानि
केधर्मैरूर्ध्वांगतिंप्रदीयते तत्वज्ञानविहीनस्यततस्तस्यपुनरागतिः तदेवपापकर्मणांगतिमुक्त्वाइहलौकि
ककर्मणांगतिमाह अथेति योगृहस्थएवावसन् स्वान्धर्मान् दोग्धिदोहसाहकाममर्थंचतानदोग्धा
धर्मान्भूयःपिपर्तिप्रवर्तयति अनुतिष्ठते १ सोपिभगवद्धर्मात्पराङ्मुखःप्राकृता
न्देवान्पितॄंश्चयजतेकिंततआह २ तेषांश्रद्धयाकामात्मसक्तेश्चपितृदेवार्थंचव्रतेनियमोनियमसो

भा.तृ.टी. ... ४८ ॥

श्री
भा टी
ती
११३

यदाब्रह्मोपासकानामपिभेददर्शनान्नाभ्यामेवावृत्तिः तदाकाम्यकर्मणांकिंवक्तव्यमितितानाह येत्विहेतिपंचभिः ये
तिकर्मस्वासक्तमनसः तेन अप्रतिषिद्धानिकाम्यानिनित्यानिचकर्माणिकात्स्न्येनकुर्वंतीति ये॥ तोदति॥
नयथाधूमसमार्गे॥ पितृलोकेव्रजंतीतिपंचमेनान्वयःमध्येत्तन्निद १५ १६ इदानींसमासेनपापस्यकनीय

येत्विहासक्तमनसः कर्मसुश्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः १५ रज
साकुंठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्यनुदिनंगृहेष्वभिरताशयाः १६ त्रैवर्गिके
स्तेपुरुषाविमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः १७
नूनंदैवेनविहितायेचाच्युतकथासुधां हित्वाशृण्वंत्यसद्गाथाः
पुरीषमिवविड्भुजः १८ दक्षिणेनपथार्यम्णःपितृ
लोकंव्रजंतिते प्रजामनुप्रजायंतेश्मशा
नांतक्रियाकृतः १९ ॥

उरुविक्रमस्यकथनीयस्यमधुद्विषःकथायांविमुखाःयेतेत्रैवर्गिकाः १७ येचाच्युतस्यकथासुधांहित्वाअ
सतांगाथाःशृण्वंतितेनूनंदैवेनविहताअभाग्याः १८ पितृलोकात्पुनःप्रजामनुप्रजादिषुप्रजायंते गर्भा
दानादारभ्यश्मशानांताःक्रियाःकुर्वंतीतितथोक्ताःकामिनस्तेपुनःप्रजायंतेतदाह १९ ॥

47

परेत्यदेहंगत्वाभगवंतंहिरण्यगर्भमनुप्रविष्टायेयोगिनः अमृतंपरमानंदरूपंप्रधानमव्यक्तंब्रह्मतेनैवसहो
पयांतिननुसर्वंयतस्तदा अगताभिमानाः तथाचश्रुतिः ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मा
नः प्रविशंतिपरंपदमिति भगवदुपासकास्तुसाक्षादेवतंप्राप्नुवंतिनतुक्रमेण अतस्त्वंसाक्षात्तमेवभजेत्याह ९ अ
थतंसाक्षाद्भावेनप्रेम्णा एवंतावद्भगवद्भक्तानांनिरंतरंसेवनतत्वाभिः भगवद्भेदेनहिरण्यगर्भोपासकानांक्रमोऽत्र

एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः तेनैवसाकममृतंपुरुषंपुराणं
ब्रह्मप्रधानमुपयांत्यगताभिमानाः ९ अथतंसर्वभूतानांहृत्पद्मेषुकृतालयं श्रुतानुभावंशरणं
व्रजभावेनभामिनि १० आद्यःस्थिरचराणांयोवेदगर्भःसहर्षिभिः योगेश्वरैःकुमाराद्यैःसिद्धैर्योग
प्रवर्तकैः ११ भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभं १२
ससंसृत्यपुनःकालेकालेनेश्वरमूर्तिना जातेगुणव्यतिकरेयथापूर्वंप्रजायते १३ ऐश्वर्यंपारमेष्ठ्यंच
तेपिकर्मविनिर्मितं निषेव्यपुनरायांतिगुणव्यतिकरेसति १४ ॥

के भेदेनोपासनंतुब्रह्मादयोऽप्यावर्तंत इति किमुतान्ये इत्याह चतुर्भिः १० योवेदगर्भःसोपिगुणव्यतिकरे
जातेपूर्वंयथाब्रह्मपदाधिकृतःसन्प्रजायतेनकेवलंसएवैकः किंतुऋषिभिर्मरीच्यादिभिःचसहजन्म
ति हृत्तद्वयभेददृष्ट्याभिमानेनकर्तृत्वादिति यथापूर्वंजन्मेत्यर्थः ११ निःसंगेननिष्कामेनकर्मणा किंकृत्वाप्र
जायतेऐश्वर्यंपारमेष्ठ्यंनिषेव्यपश्चात्सत्त्वादयोगुणाःगुणपिंडांप्रथमावतारंपुरुषं १२ येत्वत्रप्राप्यब्र
तेपिऋषिप्रभृतयः स्वकर्मनिर्मितंपारमेष्ठ्यंनिषेव्यपुरुषंचसंहृत्ययथापूर्वंव्यापिकोपिपुनरायांतीत्यन्वयः १४

श्री
भा ३
टी
११९

पराचीनैः पराङ्मुखैः शब्दादिवद्भ्रान्त्या प्रतीयमानेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैवावभाति न तत्त्वतः स्वप्रकाशत्वात्
अर्थरूपत्वमेव विवृत्य दर्शयति २७ महद्रूपः अहंकारः स च त्रिवृत् त्रिगुणात्मकः पुनश्च भूतरूपेण पंच
विधः इंद्रियरूपेणैकादशविधः स्वराड्जीवरूपः तस्य जीवस्यैव वपुरण्डं जगत् यतो येभ्यः महदादिभ्यस्ता
न्यवभाति न तु तत्त्वतः जन्म इत्येतत्प्रत्येति तन्मात्राह २८ एतद्वै ज्ञानमेवार्थस्वरूपेण प्रतिपन्नं यथैतत्तेना

एतावानेव योगेन समग्रेणात्र योगिनः युज्यतेऽभिमतो ह्यर्थो यदसंगस्तु कृत्स्नशः २६ ज्ञानमे
कं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा २७ यथा महा
नहंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरण्डं जगद्यतः २८ एतद्वै श्रद्धया भक्त्या
योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति २९ इत्येतत्कथितं गुर्वि
ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३० ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो
भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३१

नुवदति २९ अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह ३० हे गुर्वि मन्निष्ठो नैर्गुण्यो ज्ञान
योगश्च मन्निष्ठो भक्तिलक्षणश्च यो योगः तयोः द्वयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्द उपलक्षि
तो ज्ञापको यस्य तदुक्तं गीतासु ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति ननु ज्ञानयोगस्यात्मलाभः
फलं श्रवणादिना दृश्यते भक्तियोगस्य तु भजनीयस्य प्राप्तिः कथं तयोरेकार्थत्वमित्याशंक्याह श्रोतृत्वेनोप
पादयति ३१ ॥

48

ततस्ते पुनरिमं लोकं प्रतिपद्यन्त इति विभ्रंशिता उदया भोगसाधनं येषां २० परमेष्ठिनं परमेश्वरं तस्य गुणाना
श्रयते यया भक्त्या भजनीयं पदाम्बुजं यस्य तं एवं भवत इत्यर्थः २१ तदेवोपपादयति २२ यदास्य भक्तिवि
ते भगवत्यनुरागेण तस्मिन्नेव निश्चलं सदिन्द्रियवृत्तिभिः वैषम्यमर्थेषु पुनर्न गृह्णाति २३ तदैवात्मानं
स्वप्रकाशमीक्षते कथंभूतं सममेव तद्दर्शनेनात्त उत्थितो निःसंगो ससंगाद्धि वैषम्यं भवतीति निःसंगत्वे हेतुः हे

ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति पतन्ति विवशा दैवैः सद्यो विभ्रंशितोदयाः २० तस्मात्त्वं
सर्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भक्त्या भजनीयपदाम्बुजं २१ वासुदेवे भगवति भ
क्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं २२ यदास्य चित्तमर्थेषु समेष्विन्द्रियवृ
त्तिभिः न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २३ स तदैवात्मनात्मानं निःसंगं समदर्शनं हे
योपादेयरहितमारूढं पदमीक्षते २४ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृ
थग्भावैर्भगवानेक ईयते २५ ॥

योपादेयरहितं ततउत्थितः पदं स्वरूपमारूढं परमानन्दोऽहमिति निश्चयेन प्राप्तमित्यर्थः समेधितत्व
नं तदेव साक्षाद्दर्शयति २४ ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यशब्दस्पर्शकारणरूपेण पृ
थक्प्रतीयते ज्ञानमात्रेणैव समेधित्यर्थः ननु ज्ञानमात्रस्यात्मनः स्वरूपत्वात् नित्यप्राप्तमेवेति किमनेक
साधनसाध्येन योगेन प्राप्यमिति तत्राह २५ गुणातीतस्य प्राप्तिः प्रपंचसंगाभ्युदासापवर्गो फलमित्यर्थः नन्वेक

श्री
भा टी
टी
३

श्चगृहमात्तत्र उपदेशेनाधिकारिणो दर्शयति द्वाभ्यां खलायेति दृजकाय भिन्नाय डाचाराय धर्मध्वजा
ययदांभिकाय अधिकारिणमाह द्वाभ्यां पत्रुत्तु अवणान कीर्तनपरस्यापि मत्पदप्राप्तिरेव फलमित्याह अथ
पीवकार. सापि मत्पदवीमेति हि निश्चितं ४३ इति श्रीभागवतभावार्थदीपिकायां टीकायां तृतीये त्रिं पा. ३२ त्रया
स्त्रिंशे तु तस्यैवं कपिलस्योपदेशतः ज्ञानलाभेन तन्मातुर्जीवन्मुक्तिर्निरूप्यते विस्रस्तमोहपटलमाव
रणीयस्मात् तत्त्वान्येव विषयः तेनांकिता सिद्धिः सा भूमिर्यस्य ज्ञानेन तस्य भूमिरिति तेन प्रवर्तन्ते कथितवाक्यान्तरज्ञो

बहिर्जातविरागाय शान्तचित्ताय दीयतां निर्मत्सराय शुचये यस्याहं प्रेयसां प्रियः ४१ य इदं
शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४२ इति श्री
भागवते तृतीयस्कंधे द्वात्रिंशत्तमोध्यायः ३२ श्रीमैत्रेय उवाच ॥ एवं निशम्य कपिलस्य
वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टा
व तत्त्वविषयांकितसिद्धिभूमिं १ श्रीदेवहूतिरुवाच ॥ अथाप्यजोन्तःसलिले शयानं भूतेंद्रि
यार्थात्ममयं वपुस्ते २ गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २

पितवबवपु केवलं ध्यानगम्यत्वात् स च स्वयं मात्राद्यस्पृष्टत्वात् ज्जठराब्जजातः संभवानेव विश्वसर्गादि
विधत्ते ननु तव सर्गादिकर्तृत्वं कस्मिंश्चित्कालविशेषे भूतं त्वं मम याकथं जठरे भूतः तत्र याणां मध्ये कथं भूतो
वपु सत्त्वं तत्तत्रहेतुः अंतःसलिले शयानं कीदृशं भूतानि चेंद्रियाणि चार्थाश्च शब्दादयः आत्मा च मनः
एतन्मयं एतद्धामस्थित्यर्थं अतः गुणानां प्रवाहो यस्मिन् तत् अतः सदशेषस्य
कार्यकारणस्य बीजं कारणं २ ॥

यथा बहूनां रूपरसादीनां गुणानामाश्रयो गुडक्षीरादिः एक एवार्थो मार्गभेदप्रवृत्तिभिरिन्द्रियैर्नानाप्र
तीयते चक्षुषा शुक्ल इति रसनेन मधुर इति स्पर्शनेन शीत इति तथा भगवानेव तत्तद्रूपेणाववासते शास्त्रमा
र्गमेव प्रपञ्चयति त्रिभिः ३१ क्रियया पूर्त्तरूपया क्रतुभिर्यागैः मर्षणं मीमांसा आत्मेन्द्रियजयेन ३२
उभयचिह्नेन सकामनिष्कामलक्षणेन तन्मेवाह य इति ३३ अथ सकामधर्मप्राप्यस्वर्गादेरपि भगवत्पद

यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः क्रियया क्र
तुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेन्द्रियजयेनापि संन्यासेन च कर्मणाम् ३२ योगेन विवि
धाङ्गेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३३ आत्मतत्त्वावबो
धेन वैराग्येण दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३४ प्रावोचं भक्तियोगस्य
स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्योऽन्तर्धावति जन्तुषु ३५ जीवस्य संसृतीर्बह्वीरवि
द्याकर्मनिर्मिताः यास्वङ्ग प्रविशन्नात्मा न वेद गतिमात्मनः ३६ नैतत्खलायोपदिशेन्ना
विनीताय कर्हिचित् न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ३७ न लोलुपायोपदिशेन्न गृहा
रूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ३८ श्रद्दधानाय भक्ताय विनीताया
नसूयवे भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ३९ ॥

सगुणं स्वरूपमित्यर्थः एभिर्वर्त्मभिः स्वदृक् स्वप्रकाशात्मदेवं ज्ञानयोगस्वरूपं संक्षिप्य उक्तस्य च भक्तियो
गेन समानार्थत्वमुक्त्वा भक्तियोगस्वरूपं संहरति ३४ चतुर्विधं त्रिगुणनिर्गुणभेदेन अन्तर्धावति उत्प
त्तिनिधनादि करोतीति ३५ ॥

अहो बतेति । श्वपचोऽपि यस्य जिह्वाग्रे तव नाम वर्त्तते स श्वपचोऽप्यतः अस्मादेव हेतोः गरीयान् यस्माद्धे
तोः वर्त्तते अतः । जिह्वाग्रेऽनेनाग्राह तपस्तेपुः कृतवन्तः जुहुवुः होमं कृतवन्तः सस्नुः तीर्थं स्ना
ताः आर्याः सदाचाराः ब्रह्म वेदमनूचुः अधीतवन्तः तन्नामकीर्त्तनेन पवित्रा येन भूतेभ्योऽप्युत्तमा इत्यर्थः
यद्वा जन्मान्तरे तैः तप आदि सर्वं कृतमिति तन्नामकीर्त्तनेन महाभाग्योदयाद्गम्यत इत्यर्थः ७

अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्त्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मा
नूचुर्नाम गृणन्ति ये ते ७ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वते
जसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भं ८ श्रीमैत्रेय उवाच ईडितो भगवा
नेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ९ श्रीकपिल उवा
च मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे आस्थितेन परां काष्ठामचिरादवरोत्स्यसि १० श्र
द्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभयं याया मृत्युमृच्छन्त्यतद्विदः ११ मै
त्रेय उवाच ॥ इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो
ययौ १२ सा चापि तनयोक्तेन योगादेशेन योगयुक् तस्मिन्नाश्रम आपीडे सरस्वत्याः समा

प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संभाव्यं चिन्त्यं वेदा गर्भे यस्य सः ८ अविक्लवया गंभीरया
वाचा ९ सुसेव्येन सम्यगोदितेन आस्थितेन अनुष्ठितेन परां काष्ठां जीवन्मुक्तिं अवरोत्स्यसि प्राप्स्यसि
१० अतद्विदः मन्मतमविद्वांसः ११ अनुमतः अनुज्ञातः १२ सरस्वत्या आपीडे शिरोभूते तस्या
सरस्वत्या इति पाठे मकुटे ... सेविते बिन्दुसरसि समाहिता बभूव कपिलस्तामसतीं समाहितां त्यक्त्वा ययौ १३

कथंभूतो भगवान् सर्गादिर्विधत्ते गुणप्रवाहरूपेण विभक्तवीर्यः शक्तिर्यस्य शक्तिद्वारेण विधत्ते न स्वतोऽनीह इत्यर्थः यतः अनीहो निष्क्रियः तर्हि कथं शक्तिद्वारेणापि कर्तृत्वं सर्गादि विधत्ते अवितथाभिसंधिः सत्यसंकल्पः किं सर्वं विधत्ते आत्मना जीवानामीश्वरः जीवानां भोगार्थमित्यर्थः ननु कथमेकरूपविचित्रान् भोगान् विदध्यात् अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य किंच प्रलयाय यस्योदरे पतितं विश्वमासीत् सर्वं जगद्येन कथंभूतः ननु शिशोर्मयि किमेतत् दृश्यते तत्राह वटपत्रे इति अंघ्रिपादांगुष्ठं पिबतीत्यंघ्रिपानः इदं मम शिशुत्वेन दर्शितमासीदिति भावः ४ अथवा नेदमाश्चर्यमिदं

स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहोऽवितथाभिसंधि-
रात्मेश्वरोऽतर्क्यसहस्रशक्तिः ३ सर्वं भवंतं जगदम्बुजाक्ष कथं त्वयेशोदरपतितमासीत्
विश्वं युगांते वटपत्र एकः शेतेस्म मायाशिशुरंघ्रिपानः ४ त्वद्देहतेजः प्रणमाम्यपाप्मनो
निदेशभाजां च मतां विभूतये यथा वदन्ति यत्र भवन्मुकुन्द पादयोः परिपालनाय
ये ५ यन्नामधेयं श्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् श्वादोऽपि सद्यः सव-

पत्यात्मकत्वं जगतोऽभूतः किं त्वया महायज्ञत्वं दिव्यायामाविर्भूतोऽसीत्याह त्वद्देहतेजः प्रीतये तन्नाशिताशेषपापानां निदेशभाजां आज्ञाकारिणां भक्तानां विभूतये मत्कृते आत्मरूपेणावतीर्णोऽसि निदेशभाजां निर्मितस्तिरस्कृतप्रदर्शनाय अतस्त्वं दर्शनात् कृतार्थोऽस्मीति केऽस्मत्सम्यगाह ५ यन्नामधेयस्य श्रवणाद्भिर्नामधेयस्य तत्त्वं तस्य कुतो भगवतस्तव दर्शनात् कश्चित्कदाचिदपि श्वानमिति श्वादः सोऽपि सवनाय सोमयागाय कल्पते योग्यो भवतीति केन नमश्चित्तेन दर्शनेन पापानि ६ ॥

दृष्टे वत्से गौरिवाभूत् विरहान्तध्यानफलमाह २१ निस्पृहा निर्वासना बभूव २२ कपिलः
सुतो यदाह तद्भगवतो रूपं ध्यायती तेन तदात्मानं विश्वतोमुखं सर्वगतं च ध्यायती ब्रह्मण्येवावस्थितमतिर्ब
भूवेति त्रिभिरन्वयः २३ केन ध्यायती विशुद्धेन मनसा विशुद्धिकारणान्याह भक्तिप्रवाहरूपो यो यो
गस्तेन युक्तानुष्ठानेन ज्ञानेन तेनैव युक्तानुष्ठानेन च गीतासूक्तं युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्त

वनं प्रव्रजिते पत्यावपत्यविरहातुरा। ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला २१ तमेव
ध्यायती देवमपत्यं कपिलं हरिं। बभूवाचिरतो वत्स निस्पृहा तादृशे गृहे २२ ध्यायती भगव
द्रूपं यदाह ध्यानगोचरं। सुतः प्रसन्नवदनं समस्तव्यस्तचिन्तया २३ भक्तिप्रवाहयोगेन वै
राग्येण बलीयसा। युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २४ विशुद्धेन तदात्मानमात्मनि
विश्वतोमुखं। स्वानुभूत्या तिरोभूतमायागुणविशेषणं २५ ब्रह्मण्यवस्थितमतिर्भगव
त्यात्मसंश्रये। निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात्
परावृत्तगुणभ्रमा। न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः २७ ॥

स्वप्नावबोधस्य यो गोभवतीत्युक्तं विहेति ब्रह्महेतुना ब्रह्मत्वापादकेन २४ विश्वतोमुखं देहे तु स्वानुभू
त्या प्रकाशेन तिरोभूतं मायागुणविशेषणं परिच्छेदो यस्य २५ कथंभूता ब्रह्मणि जीवानां संश्रये भगव
ति तस्या जीवन्मुक्तिमाह सार्धैस्त्रिभिः निवृत्ता च निवृत्ता जीवापत्तिर्जीवभावो यस्यास्तस्या भावस्तत्त्वं तस्मात्क्षीणाः
क्लेशास निर्वृतिः स्वात्मानं जीवनं न सस्मारेत्यन्वयः ननु तथापि गुणानां विद्यमानत्वात्कथं न सस्मार ए
तत्राह २६ नित्यारूढत्वेनाप्रतिष्ठः समाधिर्यस्यास्तस्या भावस्तत्त्वं तस्मात्परावृत्तः पातो गुणानिमि

॥ २

अभीतां विश्ववागामवगाह्य स्नानं तेकपिशान् पिशाङ्गान् स्नातएवकुटिलानकेशान्तत्यात्मानंदेहेचीर
धांशिताकणांचविभ्रतीमतीवदनेकिंचिदानवीचक्षुषोकयाकुलेचकारेतिशेषेणान्वयः २४ प्रजापते।
कर्दमस्यतपोयोगाभ्यामतिपार्थितं स्वर्गाहं सा हित्वा पुत्रमथ ते स्वरविरहातराभीति वदनेकिंचिदानि
वीचक्षुषोकयाकुलेचकारेतिशेषेणान्वयः २५ यत्रगाहंमध्येतीरफेणानिभासर्द्धश्रेष्ठाः सायाश्रासन्।

अभीताविगाह्यकपिशानङ्गदिलानकुटिलालकान् आत्मानं चोग्रतपसाविभ्रतीचीराणि
कृशाम् २४ प्रजापतेः कर्दमस्य तपोयोगविजृम्भितं स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिके
रपि २५ पयःफेनानिभाःशय्यादान्ताह्यरुक्मपरिच्छदाः आसनानिचहैमानिसुस्पर्शा
स्तरणानिच २६ स्वच्छस्फटिककुड्येषुमहामारकतेषुच रत्नप्रदीपाआभान्तिललनारत्नसं
युताः २७ गृहोद्यानंकुसुमितैरम्यंबहुमराद्रुमैः कूजद्विहङ्गमिथुनंगायन्मत्तमधुव्रतं
२८ यत्रप्रविष्टमात्मानंविबुधानुचराजगुः वाप्यामुत्पलगन्धिन्यांकर्दमेनोपलालितम्
२९ हित्वातदीप्सिततममप्याखण्डलयोषिताम् किंचिच्चकारवदनंपुत्रविश्लेषणातुरा ३०

णानिभांतिदेवहूतिनामेचकाञ्चनाग्रामयपरिकराः आसनानिपीठादीनिसुस्पर्शान्यास्तरणानिपेड
२६ २७ बहुमराद्रुमैः २८ यत्रोद्यानेप्रविष्टमात्मानंदेवहूतिरिति २९ इदंसौभाग्यमपीईप्सिततमं
प्राप्तमिष्टतमंतत् हित्वाप्यभिमानंत्यक्त्वासहकृद्धियोगसमयेस्वहृतांमाह्य ३० ॥

श्री
भा. त.
टी.
१२२

उपपन्नात्मर्थंसमाहितमास्ते ३५ प्रकारमणार्थंमपमेहृयति यन्तदितिवन्तया ३६ एतत्श्रवणकीर्तनफलमा
हयःति स्वपर्णकेतौयातध्वजे उपलभतेप्राप्नोति ३७ इति भागवते महापुराणे श्रीभावार्थदीपिका

आत्मयोगं समास्थाय सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानामुपशान्त्यै समाहितः ३५
एतन्निगदितं तात यत्पृष्टोऽहं तवानघ कपिलस्य च संवादो देवहू-
त्याश्च पावनः ३६ य इदमनुशृ- णोति योऽभिधत्ते कपिलमुनेर्मत-
मात्मयोगगुह्यं भगवति कृ- तधीः सुपर्णकेतावुपलभते
भगवत्पदारविन्दम् ३७ इति श्रीभागवते महापुरा- णे
णे तृतीयस्कन्धे श्री शुकदेवपरीक्षित्संवादे वि-
दुरमैत्रेयकथने देवहूतिं प्रति श्रीमत्कपिलमुनिना
नकथने देव हूतिसमाधि
र्गतिर्नाम त्रयस्त्रिं- शत्तमोऽध्यायः
समाप्तश्चायं तृतीयस्कन्धः

ओं तृतीयस्कंधे टीकायां श्रीधरस्वामिविरचितायां तृतीयस्कंधे त्रयस्त्रिंशत्तमोऽध्यायः ३३
समाप्तमिति तृतीयस्कंधटीकायाम् ३ ॥

परतः परामिवैककं समस्तं विद्याधरीभिः पोषणीयस्याधिमनोग्लानिः तदसम्भवात्कृशो मलैरवच्छन्नो
पि बभौ २८ दैवगुप्तं प्रारब्धकर्मपालितं निर्वाणं नित्यमञ्जनं ३० देवी रविश्रुतं ३१ सौम्यतत्सौम्यात्मनाम

तद्देहः परतः पोषोऽप्यकृशश्चाध्यसम्भवात् बभौ मलैरवच्छन्नः सधूम इव पावकः २८ स्वा
ङ्गं तपोयोगमयं मुक्तकेशं गताम्बरं दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः २९ एवं सा कपिलो
क्तेन मार्गेणाचिरतः परं आत्मानं ब्रह्मनिर्वाणं भगवन्तमवाप ह ३० तद्वीरासीत्पुण्यतमं
क्षेत्रं त्रैलोक्यविश्रुतं नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमा
र्त्यं मर्त्यमभूत्सरित् स्रोतसां प्रवरा सौम्य सिद्धिदा सिद्धसेविता ३२ कपिलोऽपि महायोगी भगवान्
पितुराश्रमात् मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ३३ सिद्धचारणगन्धर्वैर्मुनिभिश्चाप्सरोग
णैः स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ३४

पारीरंसरिदभूत् कथंभूतं योगेन विधुतानि विलीनानि मार्त्यानि दैहिकानि यानि मलानि यस्याः कपिलो ययावित्युक्तं
तदेव प्रपंचयति त्रिभिः ३२ समनुज्ञाप्यानुज्ञां प्राप्य ३३ दत्तमर्हणं पूजा निकेतनं च स्थानं यस्मै ३४